PAR-1601100102020500 Seat No. ________

# M.A. (CBCS) (W.E.F. 2016) (Sem. II) Examination

## August/September – 2020

## Sanskrit : CCT-05

*Gadyakavya*

*(Old Course)*

(1) हर्षचरितम् (उच्छवास–५)

(2) दशकुमारचरितम् (उच्छवास–८)

Time : $2\frac{1}{2}$ Hours] [Total Marks : **70**

1 નીચેનામાંથી કોઈપણ બે ગદ્યખંડોનો અનુવાદ કરો. १४

1 Translate any two of the following passages. 14

(1) अथ दूरादेव लेखगर्भया नीलीरागमेचकरुचा चीरचीरिकया रचितमुण्डमालकम्, श्रमातपाभ्यामारोप्यमाणकायकालिमानम्, अन्तर्गतेन शोकशिखिनाडङ्गारताभिव नीयमानम्, अनित्वरागमनद्रुततरपदोद्धूयमान धूलिराजिव्याजेन राजवार्ता श्रवणकुतूहलिन्या मेदिन्येवानुगम्यमानम्, अभिमुखपवनप्रेङ्खत्प्रविततोत्त–रीयपटंप्रान्तवीज्यमानोभयपार्श्वमतित्वरया कृतपक्षमिवाशु परापतन्तम्, प्रेर्यमाणमिव पृष्ठतः स्वाम्यादेशेनाकृष्यमाणमिव पुरस्तादायतैः श्रमश्वासमोक्षैः ।

(2) दृष्ट्वा च प्रथमदुः खसंपातमध्यमानमतिराशङ्कित इव भागधेयेभ्यः समभवत् । अन्तकपुरवर्तिनमेव च पितरममन्यत । निराकृत इव चान्तः करणेन क्षणमासीत् । अवधूतश्च धैर्येण, क्षेत्रीकृतः क्षोभेण, रिक्तीकृतो रत्या, विषयीकृतो विषादेन, पावकमयमिव हृदयमुद्वहन्, विषमविषदूषितानीव मुह्यन्तीन्द्रियाणि बिभ्राणः तमसा रसातलमपि विशेषयन्, शून्यत्वेनाकाशमप्यतिशयानो नाविन्दत कर्तव्यम् । पस्पर्श च हृदयेन भियमुत्तमाङ्गेन च गाम् ।

(3) विदर्भो नाम जनपदः । तस्मिन्भोजवंशभूषणम्, अंशावतार इव धर्मस्य, अतिसत्वः, सत्यवादी, वदान्यः, विनीतः, विनेता प्रजानाम्, रञ्जितभृत्यः, कीर्तिमान्, उदग्रो बुद्धिमूर्तिभ्याम्, उत्थानशीलः, शास्त्रप्रमाणः, शक्यभव्यकल्पारम्भी, सम्भावयिता बुधान्, प्रभावयिता सेवकान्, उद्भावयिता बन्धून, न्यग्भावयिता शत्रून, असम्बद्धप्रलापेष्वदत्तकर्णः, ...पुण्यश्लोकः, पुण्यवर्मा नामासीत् ।

(4) इदं तु ज्ञात्वा देव्याऽहमाज्ञप्तः – 'तात नालीजङ्घ ! जीवतानेनार्भकेण यत्र क्वचिदवधाय जीव । जीवेयं चेदहमप्येनमनुसरिष्यामि । ज्ञापय मां क्षेमप्रवृत्तः स्ववार्ताम्' इति । अहं तु संकुले राजकुले कथञ्चिदेनं निर्गमय्य विन्ध्याटवीं व्यगाहिषि । पादचारदुःखितं चैनमाश्वासयितुं घोषे कतिचिदहानि कानिचिद्विश्रमय्य तत्रापि राजपुरुषसम्पातभीतो दूराध्वमपासरम् । तत्रास्य दारुणपिपासापिडितस्य वारि दातुकामः कूपेऽस्मिन्नपभ्रश्य पतितस्त्वयैवमनुगृहीतः ।

૨ નીચેનામાંથી કોઈપણ બે પૂર્વાપર સંદર્ભ આપી સમજાવો. ૧૪

2 Explain with reference to the context any two of the following. 14

(1) देव ! तृतीयमहः कृताहारस्यास्याद्य इति ।

(2) न ह्यल्पपुण्यभाजां वंशमलंकुर्वन्ति भवादृशाः ।

(3) इयमिदानीमाचार्यविष्णुगुप्तेन मौर्यार्थे षड्भिः श्लोकसहस्रैः संक्षिप्ता ।

(4) जीवितं हि नाम जन्मवतां चतुः पञ्चाप्यहानि ।

૩ हर्षचरितम् (उच्छ्वास–५)ના આધારે હર્ષવર્ધનનું પાત્રાલેખન કરો. ૧૪

3 Draw the character sketch of हर्षवर्धन on the basis of हर्षचरितम् (उच्छ्वास–५) 14

**અથવા/OR**

૩ 'बाणोच्छिष्टं जगत्सर्वम्' આ વિધાનની ચર્ચા કરો. ૧૪

3 'बाणोच्छिष्टं जगत्सर्वम्' - Discuss this statement. 14

૪ 'दशकुमारचरितम्'માં પ્રતિબિંબિત સામાજિક સ્થિતિનું આલેખન કરો. ૧૪

4 Describe the social condition reflected in 'दशकुमारचरितम्' 14

**અથવા/OR**

૪ કથા અને આખ્યાયિકાનાં લક્ષણો આપી દશકુમારચરિતનો સાહિત્યપ્રકાર જણાવો. ૧૪

4 Give the characteristics of कथा and आख्यायिका and determine the literary form of दशकुमारचरितम्. 14

૫ નીચેનામાંથી કોઈપણ બે ઉપર ટૂંકનોંધ લખો. ૧૪

5 Write short notes on any two of the following. 14

(1) प्रभाकरवर्धनस्य मृत्युप्रसङ्गः

(2) 'हर्षचरितम्' – शीर्षकम्

(3) विहारभद्रस्य पात्रम्

(4) वसुरक्षितस्य मनोव्यथा

---